पिप्पलं मरिचं शुण्ठी श्योनविडाय चित्रकः । गृह धूमोन्मत्तरसौ लवणञ्च विषाष्टकम् । मान्तौ वस्त्रे लिखेद्भूर्जे श्मशाने द्वीपिचर्म्मणि । खरचर्म्मणि विद्वेषे उच्चाटे ध्वजवाससि । नरास्थनि लिखेद्यन्त्रं मारणे मन्त्रवित्तमः । ये त्वाधाराः स्मृता यन्त्रतरङ्गे तेऽपि सम्मताः" ।

**धारय** त्रि० धारि—श । धारके "धारयैः कुसुमोन्मीणाम्" भट्टिः ।

**धारयितृ** त्रि० धारि—तृच् । १धारणकर्त्तरि "त्वं हि धारयिता श्रेष्ठ ! कुरूणां कुरुसत्तम !" भा० उ०९४अ० । स्त्रियां ङीप् । सा च २पृथिव्यां स्त्री शब्दरत्ना० ।

**धारयिष्णु** त्रि० धृ—णिच् वेदे नि० इष्णुच् । धारणशीले "दृषदः धारयिष्णवः" सि०कौ० लोकेऽपि क्वचित् इष्णुच् । "शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता । उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता । प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता । दया शीलं दमश्चेति गुणाः सम्पत्तिहेतवः" काम० ।

**धारयु** त्रि०धारत्वमिच्छति क्यच् वेदे०नि० न दीर्घः "क्यच्छन्दसि" पा०उ । १अभिषवणकामे "त्वं सोमासि धारयुर्मन्द्रः" ऋ० ९।६७।१ "धारयुरभिषवणकामः" भा० धारयुर्धारावान् मत्वर्थीयो युरिति भाष्ये पक्षान्तरे व्याख्यानात् २धारावति च ।

**धारवाक** त्रि० धार्य्यते धारि—कर्म्मणि अच् धारो धार्य्यो वाकः स्तोत्रं येन । स्तोत्रधारके ऋत्विगादौ "धारवाकेष्वृजुगाय" ऋ०५।४४।५ ।

**धारा** स्त्री धार्य्यन्ते अश्वा अत्र अनया वा धारि—अङ् । अश्वानां १गतिभेदे अमरः । अश्वशब्दे दृश्यम् अन्यत्र च "अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा । आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् । धौरितं वल्गितं धाराप्लुतमुत्तेजितं क्रमात् । उत्तारितं चेति पञ्च शिक्षयेत् तुरगं गतीः । उत्तेरितोऽतिवेगाश्वो न शृणोति न पश्यति । धौरितं गतिमात्रे यद्युयोजितं वल्गितं पुरः । अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम् । उत्तेजितं मध्यवेगं योजनं स्वयवल्गया । पूर्वापरोन्नमनतः क्रमादुत्तारणं प्लुतम्" अश्वशास्त्रे तु मतान्तरेणोक्ताः । गतिः पुला चतुष्का च तद्वन्मध्यजवा परा । पूर्व्ववेगा तथा चान्या पञ्च धारा प्रकीर्त्तिताः । एकैका त्रिविधा धारा हयशिक्षाविधौ मता । ह्रस्वा मध्या तथा दीर्घा ज्ञात्वैता योजयेत् क्रमादिति" "धाराः प्रसाधयितुमव्यतिकीर्णरूपाः" माघः । ३सैन्याग्रिमस्कन्धे ४अविच्छिन्नसन्तत्या द्रवद्रव्यस्य प्रपाते ५खड्गादेर्निशितमुखे ६पाषाणभेदे ७कणे च पु० मेदि० । ८यशसि ९अतिवृष्टौ १०समूहे च शब्दरत्ना० ११प्रशान्ते १२उत्कर्षे १३रथचक्रे स्त्री हेम० । १४दाक्षिणात्यपुरभेदे स्त्री "विप्रा उत त्वया वयं धारा उदन्या इव" ऋ०२।७।२ । "घृतस्य धारा उपयन्ति विश्वतः" ऋ० १।१२५।४ । "धारां शितां रामपरश्वधस्य" रघुः । "भुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति" शकु० । "धारा जवेन पतिता जलदोदरेभ्यः" मृच्छ० । "तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ" रामा० ६।१९अ० । "अथ माहेश्वरीं धारां समासाद्य धराधिपः" भा० व० ८५अ० । "वसोः पवित्रमसि शतधारम्" यजु० १।२ धाराधरशब्दे दृश्यम् । १५जनप्रवादे १६वाचि निरु० इषा० आद्युदात्तता १७वर्षणे पु० धारयुः ।

**धाराकदम्ब** पु० धाराकालोपलक्षितः कदम्बः । प्रावृट्काले पुष्पवति कदम्बभेदे हेमच० ।

**धारागृह** न० जलधारायुक्तं गृहम् । (फोयारा) जलस्रावयन्त्रयुक्ते गृहे "धारागृहेष्वातपसङ्गिमन्तः" रघुः । "धारागृहे प्रगलितोदकदुर्द्दिनाभे क्लान्तः शयीत सलिलानिलशीतकुक्षौ" सुश्रुतः ।

**धाराङ्कुर** पु० धाराया अङ्कुर इव । १शीकरे २करकाख्ये घनोपले ३नाशीरे च मेदि० । [ हेमच०

**धाराङ्ग** पु० धारा अङ्गमिवास्य । १खड्गे २तीर्थभेदे च

**धाराट** पुंस्त्री धारायै अटति धारया वा अटति अट—अच् । १चातकखगे २अश्वे च स्त्रियां जातित्वात् ङीष् । ३मेघे पु० च शब्दरत्ना० ।

**धाराधर** पु० धारां धरति धृ—अच् । १मेघे २खड्गे च मेदि० । "धाराधर ! धरा वारिधारया परिपूर्य्यते । खगचञ्चुपुटद्रोणीपूरणे तव कः श्रमः" चातकाष्टकम् । "प्रत्यगृह्णात् प्रहृष्टात्मा धाराधरमिवाचलः" भा० वि० ६४अ० [कमलान्यभ्यवर्षन् मुखानि" मेघ० ।

**धारापात** पु० ६त०। जलधारायाः पतने । "धारापातैस्त्वमिव

**धारापूप** न० धाराख्यम् अपूपम् । अपूपभेदे "घृतमिश्रा कणिक्या या दुग्धेनालोडिता तु सा । धाराख्यापूपकं शाल्वे पक्वं खण्डेन योजयेत् । धारापूपं सुमधुरं हृद्यं पित्तहरं परम् । सुस्निग्धं रोचनं वृष्यमत्यर्थं वातनाशनम्" भावप्र० ।